ब्रह्मविदाचार्यकटाक्षमहिमा

शोकहर्तृपुरं रामानुजाचार्यः, बेंगलूरु

श्रीमत्परमहंसपरिव्राजकाचार्याणाम् शठकोपरामानुजयतीन्द्रमहादेशिकानां तिल्लस्थानं स्वामिन इति प्रसिद्धानां वैभवविषये 'तद्दृष्टिगोचराः सर्वे पूयन्ते सर्वकिल्बिषैः' इतिवत् तच्छिष्याग्रेसराणां शोकहर्तृपुरं महाविद्वान् घनपाठी पराङ्कुशाचार्याणां पाण्डित्यप्रदर्शनद्वारा लेखनमिदं सभक्तिश्रद्धं करणत्रययुतमञ्जलिं निवेदयति ।

श्रीरङ्गेशयतीशदेशिकमणेः पादारविन्दाश्रयं श्रीश्रीवासशठारियोगिचरणन्यस्तात्मरक्षाभरम् ।
श्रीरङ्गेशशठारिसंयमिगुरोः कारुण्यवीक्षास्पदं श्रीमच्छ्रीशठकोपलक्ष्मणमुनिं कारुण्यपूर्णं भजे ॥

श्रीमते श्रीलक्ष्मीनृसिंहपादुकासेवक श्रीशठकोपरामानुजयतीन्द्रमहादेशिकाय नमः ॥

ஸ்ரீமத்பரமஹம்ஸேத்யாதி ஸ்ரீமடகோபராமாநுஜயதீந்த்ரமஹாதேஶிகன் (ஸ்ரீதில்லஸ்தானம் ஸ்வாமி) என்ற ப்ரஸித்தரான ஸன்னதி ஸம்ப்ரதாயத்தைச் சேர்ந்த மஹான் பெங்களூர் துளஸிதோட்டத்தில் பல ஆண்டுகள் எழுந்தருளியிருந்து ஸம்ப்ரதாயப்ரவசநம் செய்த பொழுது அடியேனுடைய திருத்தகப்பனார் ஸ்ரீ. உ.வே. சோகத்தூர் பராங்குஶாசார்ய ஸ்வாமி அவரிடம் எல்லா ஸம்ப்ரதாயக்ரந்தங்களையும் காலக்ஷேபம் செய்து அவரின் பரிபூர்ண க்ருபைக்கு பாத்ரராக எழுந்தருளியிருந்தார் எனக் கேட்டிருக்-கிறேன். ஸ்ரீரங்கம் செல்லும்போது தஶாவதாரஸன்னதி அருகிலுள்ள ஸ்வாமியின் ப்ருந்தாவநத்தையும் ஸேவித்துவிட்டு வருவது வழக்கம்.

கர்நாடகப்ராந்தத்தில் ஸ்ரீமதஹோபிலமடஸம்ப்ரதாயம் தழைக்கவும், ஸ்ரீபாஞ்சராத்ர ஆகமப் படி துளஸிதோட்டம் ஸ்ரீப்ரஸன்னக்ருஷ்ணஸ்வாமி தேவாலயத்தின் பூஜாவிதிமுறைகளை நன்கு ஏற்படுத்தி, அர்ச்சகர் முதலானோரைப் பயிற்றுவித்து, இன்றளவும் தொடர்ந்தும் வர வழிவகுத்தவர் ஸ்ரீதில்லஸ்தானம் ஸ்வாமி. பல மஹனீயர்களுக்கு காலக்ஷேபம் ஸாதித்து வருங்கால், எல்லோரும் நன்கு அறியும் வண்ணம் எளிமையாகவும், தெளிவாகவும் உபதேஶம் செய்வதில் வல்லவராயிருந்தார்.

அடியேன் திருத்தகப்பனார் சாமராஜபேட்டையிலுள்ள வேதபாடஶாலையில் அத்யாபனம் செய்யும்போது சிலமுறை காலக்ஷேபம் தொடங்கினபின் சற்று விளம்பமாகச் சேர்ந்து கொள்ள நேர்ந்து, ஸ்வாமி அவர் வரட்டும் எனக் காத்திருந்ததாகவும், அதை மற்றவர் ஆக்ஷேபிக்க, ஸ்வாமி தொடங்கி, முன் நாள் நிறுத்திய இடத்தை விளக்க அங்குள்ளவர்களைக் கேள்வி கேட்டாகும்போது, சிலமுறை அதில் அவர்களின் பதில்கள் த்ருப்திகரமாக இன்றியும், அதற்குள் அடியேன் திருத்தகப்பனார் வந்துவிட, ஸ்வாமி அவரைக்கேட்க, அவர் ஶாஸ்த்ரீயமாக பதிலளித்ததைத் திருச்செவி சாத்தி உகந்ததாகச் சொல்வதுண்டு. வ்யுத்பன்னர்களை ஊக்குவித்தும், வ்யுத்பத்தியை உண்டுபண்ணுவதிலும் தேர்ந்தவர் ஸ்வாமி என்பார் அடியேன் திருத்தகப்பனார்.

எடுத்துக்காட்டாக, 'वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसम् ॥' *என்ற ஸ்ரீமத்ரஹஸ்யத்ரயஸாரபங்க்தியை விவரித்து முன்நாள் நிறுத்தியிருந்து, மறுநாள் தகப்பனார் விளம்பித்து வந்ததால், மேற்கூறியபடி அங்கிருந்தவர்கள் ஸ்வாமி விளம்பித்து வருபவர்களுக்குக் காத்திருக்கலாகாது எனத் தெரிவிக்க, ஸ்வாமி அதை இசைந்து, காலக்ஷேபத்தைத் தொடங்கி நேற்றைய ஶ்லோகத்தில் ஸௌரிஶப்தத்துக்கு அர்த்தம் சொல்ல அங்கிருந்தவரைக் கேட்க, அவர் சொல்லமாட்டாதபோது, பெண்கள் தலையில் வைத்துக் கொள்வது தானே என ஸ்வாமி வேடிக்கையாக வினவ, அவரும் அடியேன் என்ன, ஸ்வாமி நகையுடன் அவர் வரட்டுமென, அதற்குள் தகப்பனாரும் காலக்ஷேபத்தில் கலந்து கொள்ள, ஸ்வாமி அந்த கேள்வியைத் தகப்பனாரைக் கேட்டாயிற்று. அவர் பகவான் ஶ்ரீரஸேந வம்ஶத்தில்*

அவதரித்ததால் 'ஶௌரி' எனப்படுகிறான். 'ஶுரஶ்ஶௌரிர்ஜநேஶ்வர:' என்று ஸஹஸ்ரநாமத்திலும் உள்ளதெனவும், திருக்கண்ணபுரம் எம்பெருமான் ஶௌரிராஜனெனத் திருநாமம் கொண்டவனெனவும் விண்ணப்பிக்க, ஸ்வாமி, தாம் காத்திருப்பது நன்கு க்ரஹிப்பவர்களை எதிர்பார்த்து என ஸாதித்தாரென்பர். ஶ்ருதப்ரகாஶிகை, ஶததூஷணிபோன்ற உத்க்ரந்தங்களையும் ஸ்வாமி அடியேன் திருத்தகப்பனாருக்கு ஸாதித்தார்.

அந்த ஸ்வாமியின் பரிபூர்ணகடாக்ஷத்தால் தான் ஶாஸ்த்ரங்களில் நன்கு தேறி பின்னர் வேதபரீக்ஷைகளில் கூட ப்ரஸித்தியை அடைய உதவிற்றென்று அடியேன் திருத்தகப்பனார் ஸாதிப்பார். அதைப்பற்றி சிறிது ஸம்ஸ்க்ருதத்தில் மேற்கொண்டு விஜ்ஞாபிக்கிறேன்.

பெங்களூர், மைஸூர், மேல்கோட்டை போன்ற இடங்களில் வேதபரீக்ஷைகள் நடந்து வந்தன. அவற்றில் பரீக்ஷாதிகாரியாக திருத்தகப்பனார் அந்வயித்து இவர் வாயில் நல்வேதமோதும் வேதியர் வானவராவர் என்னும்படி கேள்வி கேட்பதில் புகழ் எய்தினார். வேதத்தை அத்யயனம் செய்யும்போது மனப்பாடம் செய்ய உதவும்படி லக்ஷணவிஷயங்களை கற்றல் உறுதுணையாமென, தானும் அவ்வாறே கற்பித்தும், அது அறியாதவர்க்கு அதன் உதவியை விளக்கவும் தகுந்த கேள்விகளின் மூலமாக ஶிக்ஷி(அறிவி)ப்பார். அவர் கேள்விகள் கேட்டு அதன் வாயிலாக அறியலாகும் பல விஷயங்களையும் அவை மனப்பாடம் செய்ய மிகவும் உதவுவதையும் ஓரிரண்டு எடுத்துக்காட்டுகளுடன் விளக்கி இச்சிறுகட்டுரையை முடித்துக் கொள்கிறேன்.

परीक्षकाग्रगण्याः शोकहर्तृपुरं महाविद्वान् घनपाठी पराङ्कुशाचार्यवर्याः कर्णाटकप्रान्ते तैत्तिरीयेषु बहुप्रसिद्धाः आसन्। ते परीक्षणसमये, तैत्तिरीयसंहितायां सप्तस्वपि काण्डेषु 'द्वादश मासाः सवँत्सरः' इत्यानुपूर्वीकसन्दर्भाः, 'इत्याह', 'अवरुन्धे' इत्यादि-प्रारभ्यमाणपञ्चाशतः एवंरूपेण धारणे अवधानापेक्षविषयकान् प्रश्नान् कुर्वन्त आसन् । बहुत्र किमर्थं कञ्चन प्रश्नः पृष्टः इत्यप्यवगमयन्त आसन् । दृष्टान्तार्थं केचन प्रदर्श्यन्ते -

1. चन इत्यानुपूर्व्यां पदपाठे कुत्रकुत्र एकं पदम्, कुत्र च च, न इति पदद्वयम् इति सहेतुकनिर्धारणम् । सर्वनामयोगे, समुच्चयादियोगे च ज्ञाते सति ईदृशविभागनिष्कर्षः शक्य इति । सर्वनामत्वे पदैक्यं - कदा । चन। (1.4.23(द्विः), 1.5.24,34) (आरण्यकेऽपि)

अपरम् । चन । (1.7.47)

कुतः । चन । (2.2.47, 7.2.15,16(द्विः)) (आरण्यकेऽपि)

अन्यतरान् । चन । (2.4.9)

कः । चन । (2.5.52)

किम् । चन । (2.6.47(द्विः),48, 4.5.21, 4.6.4, 6.3.28)

कतरः । चन । (3.2.45, 7.1.27)

कम् । चन । (4.6.20, 5.5.20(द्विः))

कतमत् । चन । (4.7.30)

कत् । चन । (4.7.38)

काम् । चन । (5.6.33)

एकरात्र इत्येक-रात्रः । चन । (7.2.7)

का । चन । (7.4.29)

समुच्चयार्थे पदभेदः –

आपः । वै । ओषधयः । असत् । पुरुषः । 3 । आपः । एव । अस्मै । असतः । सत् । ददति । 4 । तस्मात् । आहुः । यः । च । एवम् । वेद । यः । च । न । 5 । आपः । तु । वाव । असतः । सत् । ददति । इति । (2.1.32)

सोमस्य । वै । राज्ञः । अर्धमासस्येत्यर्ध-मासस्य । रात्रयः । पन्नयः । आसन्न् । 7 । तासाम् । अमावास्यामित्यमा-वास्याम् । च । पौर्णमासीमिति पौर्ण-मासीम् । च । न । उपेति । एत् । (2.5.36)

नमः । देवेभ्यः । इति । आह । याः । च । एव । देवताः । यजति । याः । च । न । ताभ्यः । एव । उभयीभ्यः। नमः । करोति । आत्मनः । अनार्त्यै ॥ (2.6.56)

तस्मात् । आहुः । यः । च । एवम् । वेद । यः । च । न । 6 । सुधायमिति सु-धायम् । ह । वै । वाजी । सुहित इति सु-हितः । दधाति । इति । (5.5.48)

तस्मात् । आहुः । यः । च । एवम् । वेद । यः । च । न । 4 । उपसदेत्युप-सदा । वै । महापुरमिति महा-पुरम् । जयन्ति । इति । (6.2.15)

यासाम् । च । अजायन्त । यासाम् । च । न । ताः । उभयीः । उदिति । अतिष्ठन्न् । 9 । अराथ्स्म । इति । (7.5.1)

चित् (सर्वनामत्वे चनपर्यायभूत चिदिति पदेऽप्येवम्)

कस्याः । चित् । (1.1.20, 3.1.20)

आरात् । चित् ।, अभीके । चित् । (1.7.51)

कुत्र । चित् । (2.1.62)

पाक्या । चित् ।, धीया । चित् । (2.1.64)

दिवा । चित् । (2.4.21)

त्या । चित् । (3.1.40)

यत् । चित् । (3.4.45,46)

यः । चित् । (4.1.34)

केन । चित् । (4.3.35,36)

2. तुनुपूर्वो वकारः चेत् उकारस्वरलोपानुशासनविषये विवरणम् । विचारोऽयं युष्मच्छब्दद्वितीयैकवचनरूपभूत त्वा इति पदापेक्षया तु वै - त्वै इत्यस्य संहितायां अच्परकत्वेन त्वा इति श्रूयमाणत्वे, सन्देहनिरासायापेक्षितः ।

यथा -

तु वाव - त्वाव । (समानकार्यवत्त्वात् नु वै - न्वै)

स **त्वा** इडाम् (सः । तु । वै । इडाम् । 1.7.4)

ज्योति**स्त्वा** अस्य (ज्योतिः । तु । वै । अस्य । 2.2.22)

स **त्वा** अध्वर्युः (सः । तु । वै । अध्वर्युः । 3.2.36, 6.4.12)

द्विगुण**न्त्वा** अग्निम् (द्विगुणमिति द्वि-गुणम् । तु । वै । अग्निम् । 5.2.27)

भूमा **त्वा** अस्य (भूमा । तु । वै । अस्य । 5.4.48)

ह **त्वा** अर्काश्वमेधी (ह । तु । वै । अर्काश्वमेधीत्यर्क-अश्वमेधी । 5.7.19)

इति **त्वा** अवमाय (इति । तु । वै । अवमायेत्यव-मायं । 6.2.24)

उ **त्वा** अब्रुवन् (उ । तु । वै । अब्रुवन् । 7.5.7)

हल्परकत्वे तु न सन्देहः । यथा - स त्वै विष्णुक्रमान् (1.7.26), स त्वै दर्शपूर्णमासौ (2.5.22, 3.5.3), स त्वै यजेत (2.6.32, 7.1.8), मनसा त्वै ताम् (5.1.14), तस्य त्वै शतरुद्रीयम् (5.5.40), ह त्वै जायते (7.2.39).

वाव - आप**स्त्वावा**सतः (आपः । तु । वाव । असतः । 2.1.32)

ते **त्वाव** न (ते इति । तु । वाव । न । 7.5.19)

नु - इ**न्वा** उपस्तीर्णम् (इत् । नु । वै । उपस्तीर्णमित्युप-स्तीर्णम् । 1.6.23)

मनुष्यायेन्**वै** योऽहरहः (1.5.41).

3. द्विपदजटाघनादिविषये । (द्विपदजटा,घनानां स्थानसूची)

अविशेषवर्णस्वरपदानां क्रमवदेव जटा, घनादिषु पाठः । तादृशपदानि ज्ञातुं पट्टिकैषा निर्मिता । अत्र सकृदेव दर्शितानि पदानि । तदुत्तरपदमपि पुनः तादृशमेव योज्यते क्रमपाठे । एषां विषये जटायां घने च क्रमवदेव द्विपदानि केवलं पठ्यन्ते इति यावत् । एकतिङ् वाक्यमिति सामान्यनियमेन अव्यवहिततिङन्तद्वये वाक्यभेदार्थमेव तदिति । अत्र अविशेषस्वरवर्णपदानि, कतिवारं प्रयुक्ताः, तेषां संदर्भाः, पदविधः, विशेषाश्च निर्दिष्टाः ।

आहत्य 124 पदानि, परम् अपुनरुक्तानि 39 पदान्येव । तेषु अदन्ति, रोहाव इति तिङन्तपदद्वयमस्ति । तत्र तिङ्ङतिङः इति पाणिनीयसूत्रेण निघाताभावः ज्ञेयः । अविशेषवर्णस्वरेति किम् - पाहि पाहि (1.1.20), तरति तरति (5.3.47,48), धावति धावति (2.2.20), कल्पन्ते कल्पन्ते (1.6.43), तर्पयत तर्पयत (3.1.23) इत्यादिषु द्विपदजटा, घनादि न, स्वरभेदस्य विद्यमानत्वात् । अनेन सामान्यतः वाक्यभेदद्योतकमेव पदस्य स्वरवर्णविशेषं विना पुनःपाठ इति ज्ञेयम् ।

*एति, एति (6-6-3) इत्यत्र प्रथमः उपसर्गः इतिकरणयुक्तः (उपसर्गाणामितिगत्वात्), द्वितीयः तिङन्तः हियोगात् आद्युदात्तः, इत्यतः अत्र न द्विपदजटा, घनादि (क्रमवत्) पाठः, परन्तु षट्, त्रयोदशपदवदेवेति बोध्यम् ।

एवं (3.2.30) *'नमः नमः' इति अव्यवहितपदद्वयं समानवर्णस्वरयुक्तमपि द्विपदजटा, घनादि न भवति, भिन्नवाक्यस्थत्वात् । 'महिषद्युमन्नमः । नमो विश्वकर्मणे' इति संहितायामानुपूर्वीसत्त्वादिति ज्ञेयम् ॥

1	अग्नाविष्णू इत्यग्नौ-विष्णू (प्रतीकः)	2.5.70	सुबन्तः, आमन्त्रितः, प्रग्रहः
2	अदन्ति (वाक्यभेदः)	2.3.4	तिङन्तः
3	अन्तरिक्षम् (3)	4.3.11, 5.4.27, 5.6.31	सुबन्तः, न

4	अन्नँम् (3)	5.4.44, 5.5.28, 6.6.22	सुबन्तः, न
5	अ॒प॒स्याँः	5.2.54	सुबन्तः, स्त्री
6	अप्र॑तिष्ठित॒ इत्यप्र॑ति-स्थि॒तः	6.3.16	सुबन्तः, इङ्गि॒तः, पुं
7	अग्नि॑ः	6.2.49	सुबन्तः, पुं
8	इन्द्र॑ः	7.2.38	सुबन्तः, पुं
9	उप॑हूता॒ इत्युप॑-हू॒ताः	2.6.39	सुबन्तः, इङ्गि॒तः, पुं
10	ऋ॒तव॑ः	5.4.55	सुबन्तः, पुं
11	ए॒ति॑*	6.6.3	उपसर्गः, तिङन्तः च द्वौ
12	ए॒षः	7.2.39	सुबन्तः, पुं, स
13	गा॒य॒त्री (8)	2.5.59, 5.2.18, 5.3.14, 6.3.18, 7.1.12, 7.2.8, 7.4.3, 7.4.8	सुबन्तः, स्त्री
14	चत॑स्रः	7.3.13	सुबन्तः, स्त्री
15	छ॒न्दाꣳ॑सि (3)	5.1.23, 5.2.2, 5.2.21	सुबन्तः, न
16	ज्योति॑ः	5.3.8	सुबन्तः, न
17	तत्	7.4.35	सुबन्तः, न स
18	तृ॒ती॒य॒स॒व॒नमिति॑ तृतीय-स॒व॒नम् (3)	2.2.51, 5.6.21, 6.4.21	सुबन्तः, इङ्गि॒तः
19	दे॒व॒ताँः (2)	5.4.2, 5.4.42	सुबन्तः, स्त्री
20	दे॒व॒पु॒रा इति॑ देव-पु॒राः	5.3.39	सुबन्तः, इङ्गि॒तः, पुं
21	दे॒वेभ्य॑ः (2)	3.1.14, 3.1.16	सुबन्तः, पुं
22	नम॑ः (45)	4.5.2 तः 4.5.10 अनुवाकेषु	अव्ययम्
23	पञ्च॑ (2)	4.3.24, 7.3.19	सुबन्तः, न
24	प॒शव॑ः	5.3.36	सुबन्तः, पुं
25	प्र॒जा इति॑ प्र-जाः	6.6.21	सुबन्तः, इङ्गि॒तः, स्त्री
26	प्र॒जाप॑ति॒रिति॑ प्र॒जा-प॒ति॒ः	7.2.39	सुबन्तः, इङ्गि॒तः, पुं
27	प्रा॒णा इति॑ प्र-अ॒नाः (2)	5.2.33, 6.4.39	सुबन्तः, इङ्गि॒तः, पुं
28	प्रा॒त॒स्स॒व॒नमिति॑ प्रातः-स॒व॒नम् (3)	2.2.50, 5.6.20, 6.4.20	सुबन्तः, इङ्गि॒तः, न
29	भे॒ष॒जम्	2.2.54,55	सुबन्तः, न

30	मरुतः	2.1.37	सुबन्तः, पुं
31	मुख्यः (2)	2.6.12, 5.2.36	सुबन्तः, पुं
32	यज्ञमुखमिति यज्ञ-मुखम् (2)	3.5.4, 5.3.14	सुबन्तः, इङ्ग्यः, न
33	रोहाव (वाक्यभेदः)	1.7.38	तिङन्तः
34	विराडिति वि-राट्	5.3.8	सुबन्तः, इङ्ग्यः, स्त्री
35	विशः	3.1.24	सुबन्तः, स्त्री
36	शतम्	2.4.46	सुबन्तः, न
37	सँव्वथ्सर इति सम्-वथ्सरः (15)	2.2.28, 5.1.43, 5.2.31, 5.4.35, 5.6.27[2], 5.6.28[3], 5.6.29[2], 7.2.39, 7.4.3, 7.4.8, 7.4.12	सुबन्तः, इङ्ग्यः, पुं
38	सुवः (2)	1.6.17, 1.7.25	सुबन्तः, पुं
39	स्वाहाँ (3)	7.1.41, 7.3.36[2]	अव्ययम्

अनेकपदानामविशेषवर्णस्वरप्रयोगविषये, आम्रेडितादिविषये च नात्र विमृष्टम् । अन्यत्र तेषां विषये विवरणं द्रष्टव्यम् ॥

4. याजुषवैदिकानुस्वारविषये यत्व,रत्व,द्वित्वादि ।

तैत्तिरीयसंहितायां वैदिकानुस्वारविषये अध्येतृसौकर्याय किञ्चित् प्रदर्श्यते । मकारान्तपदस्य परतः श,ष,स,ह,र वर्णेषु सत्सु गकारशब्दयुक्तवैदिकानुस्वारः प्रसज्यते । तद्विषये केचन दृष्टान्ताः -

मकारान्तस्य सामान्यतया उदाहरणानि - संहितायाम् - स꣡ शिंशाधि (1-2-4), द्रविण꣡ षोडशः (4-3-26), सपत्नसाह꣡ सम् (1-1-16), वय꣡ हितेन (1-1-26), वय꣡ रुहेम (1-2-3) इत्यादि ।

पदपाठे - त्रयस्त्रि꣡शदिति त्रयः-त्रि꣡शत् (1-5-46), अ꣡शाय (1-8-26), हवी꣡षि (1-4-48), समिष्टयजू꣡षीति समिष्ट-यजू꣡षि (6-6-6), तस्थिवा꣡सः (1-2-31), स꣡समिति सम्-सम् (1-3-18), दृ꣡हस्व (1-1-4), अ꣡होमुच इत्य꣡हः-मुचे (1-6-48), एव꣡रूपा इत्येवं-रूपाः (3-5-24), स꣡रिक्तायेति सम्-रिक्ताय (7-3-42) इत्यादि ।

अनुस्वारद्वित्वनिदर्शनानि - मकारान्तस्य - (इङ्ग्यपदेषु)

सङ्स्रावभागा इति सङ्स्राव-भागाः (1-1-23), सङ्स्थामिति सम्-स्थाम् (1-6-40), सङ्श्रवा इति सम्-श्रवाः (1-7-7), सङ्स्तुता इति सम्-स्तुताः (1-7-17, 7-4-33,34), सङ्स्थाप्येति सम्-स्थाप्य (2-5-12,23), सङ्स्थाप्यमिति सम्-स्थाप्यँम्, (2-6-6, 6-4-27), सङ्स्थापन्यतीति सम्-स्थापयन्ति (2-6-6, 6-6-35), उभयतःसङ्श्वायीत्युभयतः-सङ्श्वायि (2-6-45), सङ्स्रावमिति सम्-स्रावम् (3-1-31), सङ्स्थातोरिति सम्-स्थातोः (3-3-21), सङ्स्फान इति सम्-स्फानः, सङ्स्फानेति सम्-स्फान (3-3-23,24,27), सङ्स्रष्टेति सम्-स्रष्टा (4-6-16), सङ्स्थापयेदिति सम्-स्थापयैत् (5-1-41), सङ्स्पृष्टा इति सम्-स्पृष्टाः, असङ्स्पृष्टा इत्यसँम्-स्पृष्टाः (5-4-4), सङ्स्थापयतीति सम्-स्थापयति (5-5-1, 6-6-24), सङ्श्लिष्टा इति सम्-श्लिष्टाः (6-1-95), असङ्स्थित इत्यसँम्-स्थिते (6-3-6), सङ्स्थित इति सम्-स्थिते (6-3-27), सङ्स्पर्श्येति सम्-

स्पर्श्य (6-4-15), सꣳस्थितेनेति सम्-स्थितेन (6-4-20), सꣳस्थितिमिति सम्-स्थितिम्, सꣳस्थितस्येति सम्-स्थितस्य (6-4-21), असꣳस्पृष्टावित्यसँम्-स्पृष्टौ, सꣳस्पृष्टाविति सम्-स्पृष्टौ (6-4-30), उपरꣳस्यत इत्युप-रꣳस्यते (7-1-49), उत्क्रꣳस्यत इत्युत्-क्रꣳस्यते (7-1-51), सꣳस्थित्या इति सम्-स्थित्यै (7-5-4).

अनुस्वारद्वित्वनिदर्शनानि - मकारान्तस्य - (अनिङ्झपदेषु)

सꣳस्कृतम् (1-2-17), रꣳह्यौ (1-3-19), पुꣳस्वंतीः (2-5-48), मꣳस्ये (3-1-31), दꣳष्ट्राँभ्याम् (4-1-39, 5-7-43), शꣳस्ताँ (4-6-40), सꣳस्कृत्यं (5-6-25,26), अक्रꣳस्त (7-5-45).

ब्राह्मणे - शꣳस्यं (1-1-78), भ्रꣳश्यन्ते (आ. 1-11), हिꣳस्रातः (आ. 1-17), पुꣳश्चलूम् (3-4-1,15)

तकारचकारयोः (केवलयोः संयुक्तयोर्वा) परयोः **नकारान्तपदस्य** वैदिकानुस्वारः संहिताकाले श्रूयते । केषाञ्चन प्रदर्शनं क्रियतेऽत्र -

केवले - श्रेयाꣳश्च (श्रेयान् । च ।), पापीयाꣳश्च (पापीयान् । च ।) (1-5-40), ज्योतिष्माꣳश्च (ज्योतिष्मान् । च ।) (1-8-25, 4-6-25), कर्णाꣳश्चं (कर्णान् । च ।), अकर्णाꣳश्च (अकर्णान् । च ।) (1-8-17), शुक्राꣳश्चं (शुक्रान् । च ।), कृष्णाꣳश्चं (कृष्णान् । च ।) (2-3-3), अन्यतराꣳश्चं (अन्यतरान् । चन ।) (2-4-9), विद्वाꣳश्चित्रयां (विद्वान् । चित्रयाँ ।) (2-4-17), ग्राम्याꣳश्चं (ग्राम्यान् । च ।), आरण्याꣳश्चं (आरण्यान् । च ।) (2-5-62), याꣳश्चं (यान् । च ।) (2-6-69), जाताꣳश्चं (जातान् । च ।), जनिष्यमाणाꣳश्च (जनिष्यमाणान्। च ।) (5-3-24), विद्वाꣳश्चिनुते (विद्वान् । चिनुते ।) (5-7-39), देवाꣳश्चेत् (देवान् । च । इत् ।) (6-2-37), ऋतूꣳश्चं (ऋतून् । च ।) (7-1-9), एताꣳश्चतुरः (एतान् । चतुरः ।) (7-1-34).

संयोगे - सजाताꣳश्र्यावयति (सजातानितिं स-जातान् । च्यावयति ।) (2-2-28), नृꣳश्चौत्रः (नृन् । च्यौत्रः ।) (3-4-44). ब्राह्मणे - अमींवाꣳश्चातयस्व (2-8-47).

अनुस्वारद्वित्वनिदर्शनानि - नकारान्तस्य - तस्मिꣳस्त्वा (तस्मिन्नं । त्वा ।) (1-6-15, 1-7-21), घ्नꣳश्चरेत् (घ्नन् । चरेत् ।) (2-4-43), दधꣳश्चरुम् (दधन् । चरुम् ।) (2-5-28), (2-6-25), अश्मꣳस्ते (अश्मन्नं । ते।) (4-6-1), अपहꣳस्यग्ने (अपहꣳसीत्यप-हꣳसि) (4-7-24), कृण्वꣳस्त्वा (कृण्वन् । त्वा ।) (4-7-28), अस्मिꣳश्चामुष्मिꣳश्च (अस्मिन् । च । अमुष्मिन्नं । च ।) (7-3-9),

ब्राह्मणे - उपौहꣳश्चत्वारिं (ब्रा. 2-3-24), अमुह्यꣳस्ते, प्राजानꣳस्ते (आ. 2-1), व्रजꣳस्तिष्ठन्न, परंस्मिꣳस्तृतीयैं (आ. 2-18), प्रपणꣳश्चरामि (ए. 2-22).

स्वरपरो नकारान्तः सरेफः - त्रीꣳ रुत (2-1-64), परिधीꣳ रपं (2-6-65), त्रीꣳ रेकादशान् (3-2-46), ऋतूꣳरृक्रतुपते (4-3-32), अग्नीꣳ रप्सुषदः (5-6-2),

ब्राह्मणे - क्रतूꣳ रनुं (1-4-46), अग्नीꣳ रतिं (2-5-10), ऋतूꣳरृक्रतुपते (3-5-14,30), रश्मीꣳ रितिं (3-6-21)

आरण्यके - परिधीꣳ रंपश्यत् (7-47), गिरीꣳ रनु (7-80)

स्वरपरो नकारान्तः रेफवर्जम् - अधराꣳ अकः (1-1-22), पर्यस्वाꣳ अग्ने (1-4-51,53), देवाꣳ अपिं (1-5-46), देवाꣳ अभिशस्तेः (1-5-48), अस्माꣳ अधिपतीन्, गोमाꣳ अग्ने, अविमाꣳ अश्वी (1-6-20), अस्माꣳ अभिदासंति (1-6-49), असुराꣳअदुहत् (1-7-1), देवाꣳ अगन्म (1-7-39), सुमृडीकाꣳ अभिष्टये (2-1-64), मधुमाꣳ अस्तु (4-2-38), देवाꣳ आर्यजिष्ठः (4-3-30), महाꣳ इन्द्रः, वृष्टिमाꣳ इव (1-4-21), देवाꣳ इह (1-3-31), रेवाꣳ इत् (2-2-71), अराꣳ इव (2-5-53), मधुमाꣳ इन्द्रियावान् (3-1-33), ताꣳ इयर्त (3-1-41), एकादशाꣳ इह (3-2-46), देवाꣳ इत् (4-6-46), देवाꣳ ईडेन्यान् (2-5-56), तस्कराꣳ उत (4-1-39), देवाꣳ उशतः (4-3-32), बाणवाꣳ उत (4-5-4), पुत्राꣳ उत (4-6-46), देवाꣳ ऊर्ध्वम् (1-3-

15), दे॒वाꣳ ऊ॑चिषे (4-2-15), दे॒वाꣳ ऋ॒तुभि॑ः (1-1-28), वि॒द्वाꣳ ऋ॒तून्, ऋ॒तूꣳ ऋ॑तुपते (4-3-32), दे॒वाꣳ ऋ॑तु॒शः (5-1-59), इडा॑वाꣳ ए॒षः (1-6-20, 3-1-35), अ॒मित्राꣳ॑ ओषतात् (1-2-29).

{Cf. सप्तलक्षणव्याख्या @TMSSM #9076f नपरप्रकरणानन्तरम् - ते च स्वरपरो नकारान्तः शषसहरेफपरो मकारान्तः । VVRI 4375 प्रारम्भे - नासिक्यन्तैत्तिरीयाणामध्यायेपि यदा भवेत् । तदा गकारसंयुक्तो न शान्तिश्शासरूपरः । रषानुस्वारयोः पूर्वस्वारभागुच्चवत् स्थितः । स्वर्येतेस्मात्परावेव नादानुस्वारकौ स्मृतौ ॥) VVRI 5040 प्रारम्भे - सषयोगे हि मात्रस्याऽनयोर्ह्यस्वपूर्वयोः । व्यञ्जनोत्तरहोर्ध्वे च ज्ञघ्नयोगे तु मस्य च । 1 मकारान्तं पदं पूर्वं ज्ञेति घ्नेत्युत्तरे यदि । ज्ञेयो मकारोनुस्वारो मात्रिको धर्मवर्जितः । 2 जघ्नशातिसरूपोर्ध्वे मस्योयप्रैदहं पुनः ॥ इम्यवाहाः परे नस्याप्यनुस्वारोत्र केवलः । 3 अध्याये तैत्तिरीयाणामनुस्वारो यदा भवेत् । तदाद्यर्धो गकारः स्यादपरस्त्वनुनासिकः ॥ 4 (सर्वसम्मतशिक्षायाम्) (तद्व्याख्याने) तैत्तिरीयशाखायामनुस्वारस्याद्यर्धगकारः स्यादित्याह - अध्याये तैत्तिरीयाणामनुस्वारो यदा भवेत् । तदाद्यर्धगकारः स्यादपरस्त्वनुनासिकः ॥ स्पष्टम् । यथा । प्रत्युष्टꣳ रक्षः ४४. अनुस्वारो यजुष्येवमध्यायेऽपि यदा भवेत् । तदा गकारसंयुक्तो नशांतिः क्षासरूपरे ॥5 (व्यासशिक्षा - अनुस्वारो यजुष्येवमध्यायेऽपि यदा भवेत् २३८ तदा गकारसंयुक्तो न शान्तिश्शासरूपरः २३९) द्विमात्राकाल उच्येत ह्यन्यधर्मविवर्जितः ॥ (व्यासशिक्षा - ज्ञघ्नोत्तरो मकारश्चेदनुस्वारोऽत्र केवलः १६६ द्विमात्र इति विज्ञेयो ह्यन्यधर्मविवर्जितः १६७)

ऋकारे परभूते च रेफः पूर्वाङ्गता भवेत् ॥ (ऋकारे परभूते च रेफः पूर्वाङ्गतामियात् ॥३७४॥ व्यासशिक्षा)

स्वर्यतेऽस्मात्परो रेफो दीर्घस्वारो भवेद्यदि ॥5॥}

இப்படி ப்ரஹ்மவித்தான ஸ்ரீதில்லஸ்தானம் ஸ்வாமியின் பரிபூர்ணானுக்ரஹத்தால் அடியேன் திருத்தகப்பனார் வேத, வேதாந்தங்களில் நிகரற்று விளங்கினார் என்பது ஸ்வாமியின் பெருமையை நன்கு பறைசாற்றுகிறது.

वक्ता श्रोता वचनविषयः प्रीयतां श्रीनृसिंहः ॥

शुभमस्तु ॥